धातुवत् बोध्यानि । अस्य धातोः दिवादौ पाठात् शतरि—तिम्यन्[A]-न्ती, तेमिष्यन्-न्ती-ती, इत्यादिरूपाणि भवन्तीति विशेषः ।

(723) " तिल गतौ " (I-भ्वादिः-534. सक. सेट्. पर.)

' तिल्ल ' इत्येके ।

तेलकः-लिका, तेलकः-लिका, तितेलिषकः-तितिलिषकः-षिका, तेतिलकः-लिका ; तेलिता त्री, तेलयिता-त्री, तितेलिषिता-तितिलिषिता-त्री, तेतिलिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि किटधातुवत् (190) ज्ञेयानि ।

(724) " तिल स्नेहे " (VI-तुदादिः-1354. सक. सेट्. पर.)

तेलकः-लिका, तेलकः-लिका, तितेलिषकः-तितिलिषकः-षिका , तेतिलकः-लिका, तेलिता-त्री, तेलयिता-त्री, तितेलिषिता-तितिलिषिता-त्री, तेतिलिता-त्री ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककिल (193) धातुवत् ज्ञेयानि । कर्तरि कप्रत्यये—तिलः ।

(725) " तिल स्नेहने " (X-चुरादिः-1607. सक. सेट्. उभ.)

तेलकः-लिका, तितेलयिषकः-षिका, तेलयिता-त्री, तितेलयिषिता-त्री, तेलितम्-[B]तः ; इत्यादीनि सर्वाण्यपि रूपाणि चितधातुवत् (522) ज्ञेयानि । अस्य धातोः उभयपदित्वात् शतरि इमानि रूपाणि भवन्तीति विशेषः । यथा—तेलयन्-तितेलयिषन्-न्ती-ती, तेलयिष्यन्, तितेलयिषिष्यन्-न्ती-ती, इति ।

(726) " तिल्ल गतौ " (I-भ्वादिः-534. सक. सेट्. पर.)

' तिल ' इत्यस्य पाठान्तरमिदम् ।

तिल्लकः-ल्लिका, तिल्लकः-ल्लिका, तितिल्लिषकः-षिका, तेतिल्लकः-ल्लिका; तिल्लिता-त्री, तिल्लयिता-त्री, तितिल्लिषिता-त्री, तेतिल्लिता-त्री ; इत्यादीनि सर्वाणि रूपाणि चिल्लधातुवत् (528) बोध्यानि ।

---

A. ' तिम्यन्मते स्तिम्यति नाम मन्मनः स्तीम्यत्सु तद्व्रीलमृते वदाम्यहम् ।'
धा. का. 2.57.

B. ' काल्यप्रवेलनकरोऽयमबेलयद्द्रागन्यांश्च तेलितकृपः खलु कंपचाल्ययान् ।'
धा. का. 3.22.